"हिंसौषधीनां स्त्र्याजीवोऽभिचारो मूलकर्म च" । इति मनौ ११ अध्यायः ॥ * ॥ अथाभिचारः । "ॐ विरुद्धे रूपिणि चण्डिके वैरिणममुकं देहि देहि स्वाहा" । इति खड्गमभिमन्त्र्य खड्गमन्त्रांश्च पठित्वा खड्गं संपूज्य छागादिकममुकोऽसि इति वैरिनाम्नाभिमन्त्र्य रक्तसूत्रेण त्रिधा मुखं बद्ध्वा वैरिनाम्ना प्राणप्रतिष्ठां कृत्वा ।

"ॐ अयं स वैरी यो द्वेष्टि तमिमं पशुरूपिणं ।
विनाशय महादेवि स्फें स्फें खादय खादय" ॥

इति पठित्वा बलिशिरसि पुष्पं दत्त्वा बलिमन्त्रं पठित्वा बलिं संपूज्य अद्याश्विने मासि महानवम्यां अमुकगोत्रोऽमुकदेवशर्म्मा अमुकशत्रुनाशाय इमं छागं महिषं वा अमुकदैवतं भगवत्यै दुर्गायै तुभ्यमहं सम्प्रददे । इत्युत्सृज्य आं क्रूं फट् इति छित्त्वा मूलं पठित्वा एतद्रुधिरं दुर्गायै नमः । इति रक्तं शिरश्च दत्त्वा अष्टाङ्गमांसैर्होमं मूलमन्त्रेण कुर्य्यादिति तन्त्रसारः ॥

अभिचारी, [न्] त्रि, (अभिचरति शत्रुबधार्थं कर्म्म करोति, अभि + चर + णिनि ।) अभिचारकर्त्ता । तन्त्रादिशास्त्रोक्तानिष्टकारी । अभिपूर्ब्बचरधातोः कर्त्तरि णिन् ॥

अभिजनः, पुं, (अभिजायतेऽत्र, अभि + जन् + आधारे घञ्, वृद्ध्यभावः ।) ख्यातिः । जन्मभूमिः । कुलश्रेष्ठः । वंशः । इति मेदिनी ॥ (अन्वयः ।

"अभिजनतपोविद्यावीर्य्यक्रियातिशयैर्निजैः" ।
इति महावीरचरिते ।
"कथं दशरथाज्जातः शुद्धाभिजनकर्म्मणः" ।
इति रामायणे ।)

अभिजातः, त्रि, (अभिजन् + भावे क्तः, अभिमतं प्रशस्तं जातं जन्म यस्य सः ।) सुन्दरः । न्याय्यः । इति विश्वः ॥ कुलजः । कुलीनः । बुधः । पण्डितः । इत्यमरः ॥ (श्रेष्ठवंशोद्भवः ।

"जात्यस्तेनाभिजातेन शूरः शौर्य्यवता कुशः ।
अमन्यतैकमात्मानमनेकं वशिनां वशी" ॥
इति रघुवंशे ।
"न म्लेच्छितव्यं यज्ञादौ स्त्रीषु नापकृतं वदेत् ।
सङ्कीर्णं नाभिजातेषु नाप्रबुद्धेषु संस्कृतं" ॥

इति मनुः । उचितः । उपयुक्तः । योग्यः । सुरूपः । मनोहरः । मान्यः । पूज्यः । धन्यः । श्लाघ्यः । भगवान् । समृद्धः ।)

अभिजित्, स्त्री, (अभि + जि + क्विप् ।) दिवसस्याष्टममुहूर्त्तं । कुतपकालइति प्रसिद्धं ॥ यथा,—

"अपराह्णे तु संप्राप्ते अभिजिद्रौहिणोदये ।
यदत्र दीयते जन्तोस्तदक्षयमुदाहृतं" ॥

इति मत्स्यपुराणं ॥ नक्षत्रविशेषः । तत्तु तारकात्रयात्मकशृङ्गाटकाकृति । उत्तराषाढ़ायाः शेषपञ्चदशदण्डाः श्रवणायाः प्रथमदण्डचतुष्टयं एतद्रूनविंशतिदण्डात्मकमभिजिद्भवति ॥ इति ज्योतिषं ॥ तत्र जातफलं ।

"अतिसुललितकान्तिः सम्मतः सज्जनानां
ननु भवति विनीतश्चारुकीर्त्तिः सुवेशः ।
द्विजवरसुरभक्तो व्यक्तवाग्मानवः स्याद्-
भिजिति यदि सूतिर्भूपतिः स्ववंशे" ॥
इति कोष्ठीप्रदीपः ॥

अभिज्ञः, त्रि, (अभि साकल्येन जानाति, अभि + ज्ञा + कर्त्तरि कः ।) प्रवीणः । निपुणः । विज्ञः । इत्यमरः ॥ (बोद्धा । दक्षः । कुशलः ।

"अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः" ।
"अनभिज्ञास्तमिस्राणां दुर्द्दिनेष्वभिसारिकाः" ।
इति कुमारसम्भवे ।)

अभिज्ञानं, क्ली, (अभिज्ञायतेऽनेन, अभि + ज्ञा + करणे ल्युट् ।) चिह्नं । इति हेमचन्द्रः । (अङ्कः । लक्षणं ।

"एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनाच्चकितनयने मय्यविश्वासिनी भूः" ।
इति मेघदूते । स्मृतिः । ज्ञानभेदः ।
"एवमुक्तस्तु रामेण हनूमान् वानरर्षभः ।
पूर्ब्बवृत्तमभिज्ञानं भूयः संप्रत्यभाषत" ॥

इति रामायणे । सोऽयमितिज्ञानसाधनं चिह्नं । स्मरणार्थमङ्गुरीयादिकं चिह्नं । "अयं मैथिल्यभिज्ञानं काकुत्स्थस्याङ्गुरीयकः" । इति भट्टिकाव्ये ।)

अभितः, [स्] व्य, (अभि + तसिल् ।) शीघ्रं । साकल्यं । आभिमुख्यं । उभयतः । "अङ्कान्ययाद्वीदभितः प्रधानं" । इति भट्टिकाव्ये ।) समीपं । इति मेदिनी ॥

अभिधर्षणं, क्ली, (अभि + धृष् + भावे ल्युट् ।) रक्षःपिशाचभूतादेरभिषङ्गः । इति महाभारतं ॥ सर्व्वतोभावेन धर्षणञ्च ॥

अभिधा, स्त्री, (अभि + धा + करणे भावे च अङ्, स्त्रियां टाप् ।) नाम । इति हेमचन्द्रः ॥ न्यायमते शब्दशक्तिः । मीमांसामते विधिसमवेतविधिव्यापारीभूतपदार्थः । तस्या लक्षणं । "स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते" । इति काव्यप्रकाशः ॥ * ॥ तत्र "सङ्केतितार्थस्य बोधनादग्रिमाभिधा" । इति साहित्यदर्पणं ॥ (आख्या । आह्वा । अभिधानं । नामधेयं ।)

अभिधानं, क्ली, (अभिधीयते अनेन, अभि + धा + करणे ल्युट् ।) नाम । इत्यमरः ॥ कथनं । यथा । "तवाभिधानाद्व्यथते नताननः" । इति भारविः ॥ शब्दकोषः । यथा । "कृत्तद्धितसमासानामभिधानं नियामकं" । इति वोपदेवः ॥ (आख्या । नामधेयं ।

"आख्याह्वे अभिधानञ्च नामधेयञ्च नाम च" ।

इत्यमरः । "शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः" । इति साहित्यदर्पणे । उक्तिः । उल्लेखः । निर्द्देशः ।)

अभिधेयं, क्ली, अभिधानं । नाम । ("इति प्रयोजनाभिधेयसम्बन्धाः" इति वोपदेवः ।) अभिधीयते अनेनेति करणे यः ॥

अभिधेयं, त्रि, (अभि + धा + कर्म्मणि यत् ।) अभिधातव्यं । वाच्यं । प्रतिपाद्यं । यथा । "इति प्रयोजनाभिधेयसम्बन्धाः" । इति वोपदेवः ॥

अभिध्या, स्त्री, (अभि + ध्यै + अङ् + टाप् ।) परस्वे विषयस्पृहा । इत्यमरः ॥ परद्रव्ये जिहीर्षा । दोषचिन्तापूर्ब्बकं परस्वे लिप्सा इत्येके । विषयप्रार्थना । इति स्वामी । विषयस्य लाभस्य स्पृहा विषयस्पृहा विषयेण चौर्य्यादिना स्पृहा इति तृतीयासमासः इत्यन्ये । विषयिस्पृहेतिपाठे परस्वविषये विषयितया स्पृहा जिहीर्षामात्रं । इति कश्चित् इति कौमुदी । इत्यमरटीकायां भरतः ॥ अभिलाषः । इति रायमुकुटः ॥

अभिनन्दनः, पुं, (अभिनन्दयति, अभि + नदि + णिच् + ल्युट्) बुद्धविशेषः । चतुर्थस्तीर्थकरजिनोऽयं । इति हेमचन्द्रः ॥ सर्व्वतोभावेनानन्दजनके त्रि ॥

अभिनयः, पुं, (अभिनीयते हृद्गतक्रोधादिभावः प्रकाश्यतेऽनेन अभि + नी + करणे अच् । हृद्गतक्रोधादिभावाभिव्यञ्जकः । अङ्गुल्यादिना व्यक्तीकृतमनःकार्य्यं । तत्पर्य्यायः । व्यञ्जकः २ । इत्यमरः ॥ दृश्यकार्य्यं । रङ्गादिभिर्नटैः रामयुधिष्ठिरादीनामवस्थानुकरणं । स चतुर्व्विधः । आङ्गिकः १ । वाचिकः २ । आहार्य्यः ३ । सात्त्विकः ४ । इति साहित्यदर्पणं ॥ ("तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपा बुधाः शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम्" । इति उत्तरचरिते ।)

अभिनवः, त्रि, (अभि + नु + भावे अप् ।) नूतनः । इत्यमरः ॥

("अभिनवमधुलोलुपस्त्वं
तथा परिचुम्ब्य चूतमञ्जरीम्" ।
इति शाकुन्तले ।)

अभिनवोद्भित् [द्] पुं, (अभिनवं यथातथा उद्भिनत्ति उद्भिद्य जायते, अभिनव + उत् + भिद् + कर्त्तरि क्विप् ।) अङ्कुरः । इत्यमरः ॥

अभिनिर्मुक्तः, पुं, (अभि साकल्येन सायन्तनकार्य्येण निर्मुक्तः ।) सूर्य्यास्तकालशायी । यस्मिन् सुप्ते सूर्य्योऽस्तं याति सः । इत्यमरः ॥

("सूर्य्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः ।
प्रायश्चित्तमकुर्व्वाणो युक्तः स्यान्महतैनसा" ॥
इति मनुः ।)

अभिनिर्याणं, क्ली, (शत्रुमभिलक्षीकृत्य निर्य्याणं निर्गमः ।) विजिगीषोः प्रयाणं । यात्रा । इत्यमरः ॥ (जिगीषया गमनं ।

"यत्नेनयाभिनिर्य्याणं स्मृतं तदभिषेणनम्" ।
इति हलायुधः ।)

अभिनिवेशः, पुं, (अभि + नि + विश् + भावे घञ् ।) मनःसंयोगविशेषः । मनोनिवेशः । आवेशः । शास्त्रादौ प्रवेशः । तत्पर्य्यायः । निबन्धः २ । इति हेमचन्द्रः ॥ योगशास्त्रमते मरणजन्यभयजनकाविद्याविशेषः ॥ (आग्रहः । अवश्यमिदं कर्त्तव्यमित्यादिरूपोऽध्यवसायः । दृढ़सङ्कल्पः ।

"इत्युक्तवन्तं जनकात्मजायां
नितान्तरूक्षाभिनिवेशमीशं" ।
इति रघुवंशे ।
"अथानुरूपाभिनिवेशतोषिणा
कृताभ्यनुज्ञा गुरुणा गरीयसा"